नोक्तपूर्व्वं मे न च वक्ष्ये कदाचन। कृच्छ्रेष्वपि गतः सौम्य! क्षत्त्रधर्म्मेण ते शपे। यज्ञैर्बहुविधैरिष्टं प्रजाधर्म्मेण पालिताः। गुरवश्च महात्मानः शीलवृत्तेन तोषिताः। धर्म्मे प्रयतमानस्य यज्ञं चाहर्त्तुमिच्छतः। परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव!। दैवमेव परं मन्ये पौरुषं तु निरर्थकम्। दैवेनाक्रम्यते सर्व्वं दैवं हि परमा गतिः। तस्य मे परमार्त्तस्य प्रसादमभिकाङ्क्षतः। कर्त्तुमर्हसि भद्रन्ते दैवोपहतकर्म्मणः। नान्यं गतिं गमिष्यामि नान्यच्छरणमस्ति मे। दैवं पुरुषकारेण निवर्त्तयितुमर्हसि” ५८ स०।

“उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः! अब्रवीत् मधुरं वाक्यं साक्षाच्चण्डालताङ्गतम्। इक्ष्वाको! स्वागतं वत्स! जानामि त्वां सुधार्म्मिकम्। शरणं ते प्रदास्यामि मा भैषीर्न्नृपपुङ्गव!। अहमामन्त्रये सर्व्वान्महर्षीन् पुण्यकर्म्मणः। यज्ञसाह्यकरान् राजंस्ततो यक्ष्यसि निर्वृतः। गुरुशापकृतं रूपं यदिदं त्वयि वर्त्तते। अनेन सह रूपेण सशरीरो गमिष्यसि। हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप!। यस्त्वं कौशिकमागम्य शरण्यं शरणागतः। एवमुक्त्वा महातेजाः पुत्त्रान् परमधार्म्मिकान्। व्यादिदेश महाप्राज्ञान् यज्ञसम्भारकारणात्। सर्व्वान् शिष्यान् स चाहूय वाक्यमेतदुवाच ह। सर्व्वानृषीन् सवाशिष्ठानानयध्वं ममाज्ञया। सशिष्यान् सुहृदश्चैव सर्त्विजः सुबहुश्रुतान्। यदन्यो वचनं ब्रूयान्मद्वाक्यबलनोदितः। तत्सर्व्वमखिलेनोक्तं ममाख्येयमनादृतम्। तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया। आजग्मुरथ देशेभ्यः सर्व्वेभ्यो ब्रह्मवादिनः। ते च शिष्याः समागम्य मुनिं ज्वलिततेजसम्। ऊचुश्च वचनं सर्व्वं सर्व्वेषां ब्रह्मवादिनाम्। श्रुत्वा ते वचनं सर्व्वे समायान्ति द्विजातयः। सर्व्वदेशेभ्य आगच्छन् वर्जयित्वा महोदयम्। वाशिष्ठं यच्छतं सर्व्वं क्रोधपर्य्याकुलाक्षरम्। यथाह वचनं सर्व्वं शृणु त्वं मुनिपुङ्गव!। क्षत्त्रियो याजको यस्य चण्डालस्य विशेषतः। कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः। ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनम्। कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः। एतद्वचननैष्ठुर्य्यमूचुः संरक्तलोचनाः। वाशिष्ठा मुनिशार्द्दूल! सर्व्वे सहमहोदयाः। तेषां तद्वचनं श्रुत्वा सर्व्वेषां मुनिपुङ्गवः। क्रोधसंरक्तनयनः सरोषमिदमब्रवीत्। यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम्। भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः। अद्य ते कालपाशेन नीता वैवस्वतक्षयम्। सप्त जातिशतान्येव मृतपाः सम्भवन्तु ते। श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः। विक्रियाश्च विरूपाश्च लोकाननुचरन्त्वमी। महोदयश्च दुर्बुद्धिर्मामदुष्यं ह्यदूषयत्। दूषितः सर्व्वलोकेषु निषादत्वं गमिष्यति। प्राणातिपाननिरतो निरनुक्रोशताङ्गतः। दीर्घकालं मम क्रोधात् दुर्गतिं वर्त्तयिष्यति। एतावदुक्त्वा बचनं विश्वामित्रो महातपाः। विरराम महातेजा ऋषिमध्ये महामुनिः” ५९ स०।

“तपोबलहतान् ज्ञात्वा वाशिष्ठान् समहोदयान्। ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत। अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः। धर्म्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः। स्वेनानेन शरीरेण देवलोकजिगीषया। यथायं स्वशरीरेण देवलोकं गमिष्यति। तथा प्रवर्त्त्यतां यज्ञो भवद्भिश्च मया सह। विश्वामित्रवचः श्रुत्वा सर्व्वे एव महर्षयः। ऊचुः समेताः सहसा धर्म्मज्ञा धर्म्मसंहितम्। अयं कुशिकदायादो मुनिः परमकोपनः। यदाह वचनं सम्यगेतत् कार्य्यं न संशयः। अग्निकल्पो हि भगवान् शापं दास्यति रोषतः। तस्मात् प्रवर्त्त्यतां यज्ञः सशरीरो यथा दिवि। गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा। ततः प्रवर्त्त्यतां यज्ञः सर्व्वे समभितिष्ठत। एवमुक्त्वा च ऋषयः संजह्रुस्ताः क्रियास्तदा। याजकश्च महातेजा विश्वामित्रोऽभवत् क्रतौ। ऋत्विजश्चानुपूर्व्वेण मन्त्रवन्मन्त्रकोविदाः। चक्रुः सर्व्वाणि कर्म्माणि यथाकल्पं यथाविधि। ततः कालेन महता विश्वामित्रो महातपाः। चकारावाहनं तत्र भागार्थं सर्व्वदेवताः। नाभ्यागमंस्तदा तत्र भागार्थं नास्य देवताः। ततः कोपसमाविष्टो बिश्वामित्रो महामुनिः। स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत्। पश्य मे तपसो वीर्य्यं स्वार्जितस्य नरेश्वर!। एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा। दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर!। स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलम्। राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज। उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः। दिवं जगाम काकुत्स्थ! मुनीनां पश्यतां तदा। स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः। सह सर्व्वैः सुरगणै-